**मुख्यवार्ता:**

- **मन्त्रिमण्डलेन अष्टमस्य केन्द्रीयवेतनआयोगस्य सन्दर्भनियमाः अनुमोदिताः ।**
- **आन्ध्रप्रदेश ओडिशा राज्ययोः मोन्था-चक्रवातस्य कारणात प्रचण्डवृष्टिः, प्रचण्डवातः प्रवर्तते। मचिलीपट्टणम्-कलिङ्गपट्टम- क्षेत्रयोः मध्ये काकीनाडा- क्षेत्रस्य समीपे चक्रवात-प्रवेशस्य संभवना।**
- **राष्ट्रपतिः द्रौपदी मुर्मुः अन्ताराष्ट्रिय-सौर-सङ्घटनस्य (आई. एस्. ए.) इत्यस्य सभायाः अष्टमं सत्रं उद्घाटितवती। जलवायु-परिवर्तनस्य समाह्वानान् निवारणाय त्वरितस्य दृढस्य च उपायानां आवश्यकतायाः उपरि बलम् प्रदत्तवती।**
- **बिहार-विधानसभा-निर्वाचनस्य निर्वाचन-प्रचारः द्रुतगत्या प्रचलति।**
- **चतुरङ्ग-क्रीडायां भारतस्य डी. गुकेशः अमेरिकीय-क्रीडकौ हिकारु-नाकामुरा तथा फॅबियानो-कारुआना इत्येतौ पराजित्य क्लच्-चतुरङ्ग-चम्पियन्स-क्रीडायां अग्रतां प्राप्नोत्।**

**मन्त्रिमण्डल**

केन्द्रीयमन्त्रिमण्डलेन अष्टमस्य केन्द्रीयवेतनआयोगस्य कार्यक्षेत्रस्य अनुमोदनं कृतम्। अद्य नवदिल्लयाम मन्त्रिमण्डलसभायाः अनन्तरं वार्ताहरान् ज्ञापयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् आयोगः विधान तिथितः अष्टादश मासेषु स्वस्य अनुशंसाः प्रस्तोष्यति। सः सूचितवान् यत् आयोगे एकः अध्यक्षः, एकः अंशकालिकः सदस्यः, एकः सचिवः च ऐते भविष्यन्ति।

**वष्णिवः चक्रवात**

रेलमंत्री अश्विनी वैष्णवः चक्रवातम् निधाय समीक्षां कृतवान्, रेलविभागीय -अधिकारिभ्यः च निर्देशं दत्तवान्।

**चक्रवातः मोन्था**

मोन्था चक्रवातः नवतितः शतम् कि. मी. परिमितं यावत् प्रतिहोरायाः वेगेन वायुः दशाधिकैकशतं कि. मी. परिमितं प्रतिहोरा यावत् तीव्रं चक्रवातवातरूपेण परिवर्तितः, मोन्था-चक्रवातः आन्ध्रप्रदेशे प्रचण्डवृष्ट्या, प्रचण्डवातेन, जलप्लावनेन च प्रवर्तते। उत्तर-पश्चिम-दिशि गम्यमानस्य चक्रवातस्य अद्य सायङ्काले एव मचिलीपट्टणम्-कलिङ्गपट्टम- क्षेत्रयोः मध्ये काकीनाडा- क्षेत्रस्य समीपे प्रवेशस्य संभवना अस्ति। काकिनाडा, मचिलीपट्टणम्, कृष्णा, पश्चिमगोदावरि, कोनासीमा, बापटला, प्रकाशम, नेल्लोर्, रायलसीमा- ऐषां केषुचित् भागेषु च प्रातःकालादेव प्रचण्डवृष्टिः भवति। काकीनाडा-उप्पदा-क्षेत्रयोः मध्ये अष्ट किलोमीटर् परिमितं यावत् समुद्रतटमार्गः क्षतिग्रस्तः अभवत्। समुद्रस्य स्थितिः अशान्ता एव अस्ति। काकिनाडा-पत्तने आपत्-सङ्केतस्य संचेतना प्रसारिता। अन्येषाम् अपि पत्तनानां कृते न्यूना संचेतना अस्ति। राज्यसर्वकारेण चक्रवात-संभावित-ग्रामात् जनान् आहारैः जलैः च सह सञ्चालितेषु उद्धार-शिबिरेषु स्थानान्तरितं। बृहति स्तरे उद्धारकार्याणि च प्रचलन्ति।

ओडिशा-राज्ये, राज्यस्य दक्षिण-तटीय-मण्डलेषु अद्य प्रातःकालात् तीव्र 'मोन्था' चक्रवातस्य प्रभावेन वृष्टिः भवति। मुख्यमन्त्री मोहनचरण माझी अद्य भुवनेश्वरनगरे 'मोन्था' इत्यस्य कृते राज्यस्य सज्जतायाः मूल्याङ्कनं कर्तुं उच्च-स्तरीय-समीक्षा-सभायाः अध्यक्षतां कृतवान्।

चेन्नई, तिरुवळ्ळूर्, काञ्चीपुरम् इत्येतेषु मण्डलेषु मत्स्यपालनकार्याणि पूर्णतया स्थगितानि। ऋतु विभागेन उत्तरतटीय-तमिलनाडु-प्रदेशे, समीपस्थेषु मण्डलेषु च तीव्रवायु-प्रवाहस्य सञ्चेतना प्रसारिता। चेन्नई-नगरे तथा समीपस्थेषु क्षेत्रेषु अद्य लघुतः मध्यमा वर्षा भवति।

**राष्ट्रपतिः- आई. एस्. ए.**

राष्ट्रपतिः द्रौपदी मुर्मुः जलवायु-परिवर्तनस्य समाह्वानान् निवारणाय त्वरितस्य दृढस्य च उपायानां आवश्यकतायाः उपरि बलम् प्रदत्तवती। यस्य सम्पूर्णे विश्वे प्रभावः दृश्यते इति अवधानं दत्तवती। अद्य नवदेहली-नगरे अन्ताराष्ट्रिय-सौर-सङ्घटनस्य (आई. एस्. ए.) इत्यस्य सभायाः अष्टमे सत्रे मुख्याभिभाषणं कुर्वन्ती राष्ट्रपतिः अवधानं दत्तवती यत् भारतं जलवायु-परिवर्तनस्य समाह्वानान् निवारणाय प्रतिबद्धः अस्ति, तथा च अस्मिन् विषये दृढपदाक्षेपाणि स्वीकरोति। सा उल्लिखितवती यत् भारते तथा सम्पूर्णे विश्वे सभ्यताः दीर्घकालं यावत् सूर्यम् जीवनस्य ऊर्जायाः च परमस्रोतरूपेण स्वीकुर्वन्ति।

वैश्विकरूपेण अन्ताराष्ट्रिय-सौर-सङ्घटनस्य उल्लेखनीयं प्रगतिम् अवलम्ब्य राष्ट्रपतिः अवधानं दत्तवती यत् अग्रिमे चरणे गहनसमावेशः भवेत्, येन अस्मिन् सौरक्रान्त्यां काचित् अपि महिला, कृषकः, ग्रामः, लघुद्वीपः वा अवशिष्टः न भवेत् इति सुनिश्चितं भवेत्।

**कृत्रिमवृष्टिः**

राजधान्याम् दिल्ल्यां प्रदूषणम् निवारयितुं कृत्रिमवृष्टिः कार्यते। पर्यावरणमन्त्री मञ्जिन्दरसिंह सिरसा उक्तवान् चतुर्षु होरासु अनेकेषु क्षेत्रेषु वर्षा भवितुं शक्नोति।

**बिहार-विधानसभा**

बिहार-विधानसभा-निर्वाचनस्य निर्वाचन-प्रचारः द्रुतगत्या प्रचलति। अग्रिमे मासे षट्दिनाङ्के प्रथम-चरणस्य मतदानं भविष्यति। अतः एन्. डी. ए. तथा महाघटबन्धन् इत्येतयोः घटकदलानि मतदातृन् आकर्षयितुं सर्वविध प्रयासरताः सन्ति। आर्. जे. डी. दलस्य नेता तेजस्वी यादवः अवदत् यत्, महाघटबन्धनम् अद्य स्वकीयस्य समूहस्य दृष्टिं प्रकाशयन् घोषणापत्रं प्रकाशयिष्यति। सः एन्. डी. ए-पक्षस्य दूरदृष्टेः, कार्यसूच्याः, मुख्यमन्त्रिपदस्य प्रत्याशिनः नाम्नः च विषये प्रश्नान् उत्थापितवान्।

भाजपा-दलस्य वरिष्ठः नेता तथा केन्द्रीय-गृहमन्त्री श्वः दरभङ्गा, समस्तीपुर्, बेगुसराय् इत्येतेषु स्थानेषु बहुविधां निर्वाचन-सभाम् सम्बोधयिष्यति। तथैव, भाजपा-दलस्य वरिष्ठः नेता तथा रक्षामंत्री राजनाथसिंहः दरभङ्गा, पटना, सारण इत्येतेषु जनपदेषु जनसभां सम्बोधयिष्यति। अत्रान्तरे, आर्. जे. डी. दलस्य नेता तेजस्वी प्रसाद यादवः अद्य सारण-जनपदस्य माञ्झी, तरैया, मढौरा, अमनौर, गरखा इत्यत्र च महा-गठबन्धनस्य प्रत्याशिनां समर्थने निर्वाचन-सभाम् संबोधयिष्यति।

**अमरिका-अवरोध**

संयुक्तराज्यामेरिकादेशे सप्तविंशति दिवसानां सर्वकारीय वित्तकार्यावरोधेण विमानयात्रा निरन्तरं बाधितास्ति। चतुःसहस्रतोप्यधिकानि विमानयानानि विलम्बेन प्रचलन्ति, प्रायः अष्टादशाधिकैकशतम यावत् अतिरिक्तानि विमानयानानि निरस्तीकृतानि। राष्ट्रव्यापि-विमानस्थानकेषु, वायुयान-यातायातनियन्त्रण-स्थलेषु च आवश्यक-कर्मचारिणम् अभावेन विलम्बः भवति। प्रायः त्रयोदशसहस्राणि यावत् वायुयान-यातायात-नियन्त्रकाः, पञ्चाशत्-सहस्राणि यावत् परिवहन-सुरक्षा-प्रशासन-अधिकारिणः च मासिकस्य देयराशिं विनैव कार्यं कुर्वन्ति। यस्य परिणामेन व्यापकरूपेण परिचालन- समाह्वानः भवति।

**सऊदी अरब-प्रवासि परिचय संस्करण**

सऊदी अरबस्य राजधान्यां रियादनगरे भारतीयदूतावासः अद्यप्रभृतिः नवम्बरमासस्य तृतीय दिनाङ्कं यावत् प्रवासि-परिचयस्य तृतीय-संस्करणस्य आयोजनं कुर्वन् अस्ति। अस्मिन् सांस्कृतिकमहोत्सवे भारतस्य विविधाः विरासताः प्रदर्शयिष्यन्ते।

**छठमहोत्सवः**

आस्थायाः लोकप्रियः उत्सवः चतुर्दिवसीयः छठमहोत्सवः अद्य देशे सर्वत्र उदीयमानाय सूर्याय अर्घ्यस्य अर्पणेन सह सम्पन्नः। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी जनान् अभिनन्दितवान्।

**चतुरङ्ग-क्रीडायां**

चतुरङ्ग-क्रीडायां भारतस्य डी. गुकेशः अमेरिकीय-क्रीडकौ हिकारु-नाकामुरा तथा फैबियानो-कारुआना इत्येतौ पराजित्य क्लच्-चतुरङ्ग-चैम्पियन्स-क्रीडायां अग्रतां प्राप्नोत्।

**॥ इति वार्ताः ॥**